# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्

## सत्रान्तपरीक्षा – डिसेम्बर – २०१८

**कक्षा** – शास्त्रीद्वितीयवर्षम् (SEM- 3) **प्रश्नपत्रम्** – ८ **गुणाः** - ७०

**विषयः** - साहित्यम् **कोड** – **CE 2.3.6. (OLD)** **समयः** - ०२ त: ०५

**दिनाङ्कः** - १२/१२/२०१८ **सन्दर्भग्रन्थः** – वेणीसंहारम् (१ से ३ अंङ्काः)

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ अधोलिखितश्लोकेषु द्वयोः श्लोकयोः ससन्दर्भं व्याख्या कार्या ।** १०

(१) निर्वाणवैरदहनाः प्रशमादरीणां, नन्दन्तु पाण्डुतनयाः सह माधवेन ।
रक्तप्रसाधितभुवः क्षतविग्रहाश्च, स्वस्था भवन्तु कुरुराजसुता सभृत्याः ॥

(२) जीवत्सु पाण्डुपुत्रेषु दूरमप्रोषितेषु च
पाञ्चालराजतनया वहते यदिमां दशाम्॥

(३) आत्मारामा विहितरयो निर्विकल्पे समाधौ,
ज्ञानेत्सेकाद्विघटिततमोग्रन्थयः सत्त्वनिष्ठाः ।
यं वीक्षन्ते कमपि तमसां ज्योतिषां वा परस्तात्
तं मोहान्धः कथमयममुं वेत्तु देवं पुराणम् ॥

**प्रश्नः – २ नारायणभट्टस्य परिचयं ददातु ।** १०

**अथवा**

**प्रथमाङ्कस्य कथासारं लिखन्तु ।**

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ३ निम्नश्लोकेषु द्वयोः श्लोकयोः सप्रसङ्गं व्याख्या कार्या ।** १०

१. सहभृत्यगणं सबान्धवं सहमित्रं ससुतं सहानुजम्
स्वबलेन निहन्ति संयुगे न चिरात्पाण्डुसुतं सुयोधनः॥

२. विकिरधवलदीर्घापाङ्गसंसर्पिचक्षुः , परिजनपथिवर्तिन्यत्र किं सम्भ्रमेण ।
स्मितमधुरमुदारं देवि! मामालपोच्चैः, प्रभवति मम पाण्योरञ्जलिः सेवितुं त्वाम् ॥

३. धर्मात्मजं प्रति यमौ च कथैव नास्ति, मध्ये वृकोदरकिरीटभृतोर्बलेन ।
एकोऽपि विस्फुरति मण्डलचापचक्रं, कः सिन्धुराजमभिषेणयितुं समर्थ ॥

**प्रश्नः – ४ द्वितीयाङ्कस्य सारं लिखन्तु ।** १०

**अथवा**

**दुर्योधनस्य चरित्र-चित्रणं वर्णयतु ।**

## तृतीयान्विति:(Unit - 3)

**प्रश्नः – ५ कयोश्चिद् द्वयो: श्लोकयो: ससन्दर्भं व्याख्या कार्या ।** १०

१) यदि समरमपास्य नास्ति मृत्यो-र्भयमिति युक्तमितोऽन्यत: प्रयातुम् ।
अथ मरणमवश्यमेव जन्तो:, किमिति मुधा मलिनं यश: कुरुध्वे ॥

२) भवेदभीष्ममद्रोणं धार्तराष्ट्रबलं कथम्
यदि तत्तुल्यकक्षोऽत्र भवान्धुरि न युज्यत ॥

३) कथमपि न निषिद्धो दु:खिना भीरुणा वा, द्रुपदतनयपाणिस्तेन पित्रा ममाद्य ।
तव भुजबलदर्पाध्मायमानस्य वाम:, शिरसि चरण एष न्यस्यते वारयैनम् ॥

**प्रश्नः – ६ तृतीयाऽङ्कस्य सारं लिखन्तु** १०

**अथवा**

**द्रौपद्या: चरित्र-चित्रणं ग्रन्थानुसारेण करोतु**

## अन्वितय: १ – ३ (Unit 1 – 3)

**प्रश्नः – ७ निम्नाङ्कितेषु दशप्रश्नानां एकवाक्येन उत्तराणि लिखन्तु ।** १०

१) वेणीसंहारनाटकस्य रचनाकार: क: ?
२) भट्टनारायणस्य माता-पित्रो: किं नामासीत् ।
३) वेणीसंहारस्य नायिका का विद्यते ?
४) वेणीसंहारनाटके कति अङ्का: सन्ति ?
५) वेणीसंहारनाटके कति स्त्रीपात्राणि सन्ति ?
६) वेणीसंहारनाटके कस्य रसस्य प्राधान्यम् ?
७) नकुलसहदेवौ कौ स्त: ?
८) सञ्जय: कोऽस्ति ?
९) बुद्धिमतिका काऽस्ति ?
१०) द्रोणाचार्यस्य पुत्रस्य नाम किम् ?
११) तृतीये अङ्के कति श्लोका: सन्ति ?
१२) दुर्योधनस्य माता काऽस्ति?
१३) सन्धिं करोतु भवतांनृपति: पणेन-इति कस्योक्ति: ?
१४) सूत: कोऽस्ति ?
१५) चेटी काऽस्ति ?

*****************